# Bharatam Atmanirbharam

# ભારતમાત્મનિર્ભરમ્

## Document Information

Text title : BhAratam Atmanirbharam

File name : bhAratamAtmanirbharam.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Svasti-Kavitanjalih (Sanskrit Gitikavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# ભારતમાત્મનિર્ભરમ્

અસ્માકમેતસ્ય પવિત્ર-ધામ્નો
વિખ્યાત-નામ્નઃ પ્રિય-ભારતસ્ય ।
શ્રુતં ચિરં સાંસ્કૃતિકં મહત્ત્વં
વ્યક્તં હિ દેશાત્મબલં જગત્યામ્ ॥ ૧॥

આસ્માકીનં ભારતં જન્મભૂમિઃ
પૂજ્યં સર્વૈઃ ભારતં કર્મભૂમિઃ ।
તસ્યામેવં સ્વાવલમ્બો વિધેયઃ
સ્વીયોદ્યોગૈઃ સૌખ્યરાશિઃ પ્રદેયઃ ॥ ૨॥

અર્થોઽસ્તિ મૂલં ખલુ જીવિકાયા
ધ્યાનં પ્રદેયં સુતરાં તદર્થમ્ ।
નાર્થં વિના જીવનમસ્તિ સાર્થં
મૂલ્યં યતોઽર્થસ્ય મહત્ પ્રશસ્યમ્ ॥ ૩॥

ગૃહે કુટુમ્બ-પ્રતિપોષણાર્થં
સન્ત્યર્થલાભાય જનાઃ કૃતોદ્યમાઃ ।
કૃત્વા નિશાહં નિતરાં પરિશ્રમં
વિત્તં સ્વયોગ્યં સમુપાર્જિતું ક્ષમાઃ ॥ ૪॥

શ્રમસ્ય મૂલ્યં ભવતીહ નાલ્પં
જાનાતિ કર્મી નિજ-મર્મગાથામ્ ।
ક્ષેત્રેષ્વનેકેષુ જનઃ શ્રમસ્ય વૈ
સમ્યક્ પ્રકુર્યાદ્ વિનિયોગમેવમ્ ॥ ૫॥

ન સર્વદાઽન્યોપરિ નિર્ભરત્વં
કામ્યં હિ લોકે વિવિધે પ્રસઙ્ગે ।
સ્વાત્માવલમ્બી લભતે સ્વબુદ્ધ્યા
મોદં પ્રતોષં દ્રવિણં ચ ગૌરવમ્ ॥ ૬॥

યાચ્ઞા પરેષાં પુરતો ન શોભના
હસ્ત-પ્રસારસ્તનુતે સ્વદીનતામ્ ।
તદાત્મનૈવાત્મન ઇષ્ટ-સાધનં
કુર્યાદ્ યથાશક્તિ જનો વિવેકવાન્ ॥ ૭॥

ધર્મો હિ કર્માચરણં સ્વકીયં
તત્રૈવ ચિત્તં સુનિવેશયેન્ નરઃ ।
સ્વકર્મ-સક્તિઃ ખલુ ગૌરવાવહા
સ્વકર્મયોગઃ સતતં શુભાસ્પદમ્ ॥ ૮॥

જ્ઞાન-કર્મ-ભક્તિમાર્ગ-માધ્યમેન નિશ્ચિતં
સ્વાવલમ્બશીલતા હિ ભારતે વિરાજતામ્ ।
હાર્દિકી સહાયતા સુગીયતાં પરસ્પરં
નૂતનં ચિરન્તનં સ્વભારતં વિરાજતામ્ ॥ ૯॥

સ્વનિર્ભરત્વે નિજ-દેશ-મુદ્રાઃ
સ્થાસ્યન્તિ નૂનં નિજ-દેશમધ્યે ।
સ્વદેશિ-વસ્તુ પ્રતિ લોક-ચિત્તં
ભવેત્ સમાકર્ષિતમેવ નિત્યમ્ ॥ ૧૦॥

વૈદેશિકં વસ્તુ વિહાય કાર્યઃ
સ્વદેશિ-વસ્તુ-વ્યવહાર એવમ્ ।
અર્થવ્યવસ્થા સુદૃઢા તતો ભવેત્
સ્વનિર્ભરત્વે સતિ ભારતે નઃ ॥ ૧૧॥

ઉદ્યોગ-સંસ્થા બૃહતી ભવેન્ નવા
ક્ષુદ્રાપિ દેશે વિવિધા ભવિષ્યતિ ।
જના નિયુક્તિં સુતરાં લભેરન્
સ્વલ્પે ચ શિલ્પેઽપ્યથવા વિશાલે ॥ ૧૨॥

આવશ્યકીં ચાર્થ-સહાયતાં વૈ
કર્ત્તું સયત્નાઃ પ્રિય-સર્વકારાઃ ।
સ્વેચ્છાનુસારં હ્યનુકૂલમિષ્ટં
ચેષ્યન્તિ કાર્યં નિજ-દેશવાસિનઃ ॥ ૧૩॥

દેશે સ્વકે નાગરિકા હિ ભારતે

પ્રાપ્સ્યન્તિ સામર્થ્યમુપાર્જનાર્થમ્ ।
અનેન વૃદ્ધિં નિજ-કર્મદક્ષતા
યાતા સ્વકાર્યેષુ જનસ્ય કુર્વતઃ ॥ ૧૪॥

ત્યક્ત્વા સ્વરાજ્યં સમુપાર્જનાર્થં
ગન્તવ્યમન્યત્ર ન ભાવિ જીવિતુમ્ ।
સ્થિત્વા સ્વરાજ્યે પ્રતિભાં વિકાશયન્
જનો ભવેદ્ વૈ ગૃહે ચાત્મનિર્ભરઃ ॥ ૧૫॥

ભવેત્ સમેષાં સહભાગિતા મિથઃ
પરસ્પરં સમ્ભવિતા સહાયતા ।
કેન્દ્રસ્ય રાજ્યસ્ય ચ સર્વકારાઃ
સર્વે સહાયા ભવિતાર એવમ્ ॥ ૧૬॥

જનાઃ પ્રકામં સ્વયમેવ કૌશલં
કાર્યે સ્વદેશે વિવિધે લભેરન્ ।
અભીષ્ટ-કર્માદિષુ સન્નિયુક્તાઃ
સ્વીયાવલમ્બં ગમિતારો નન્દિતાઃ ॥ ૧૭॥

– રચયિતા : ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*Bharatam Atmanirbharam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*